२६

॥सरमापणिसंवादसूक्तम्॥

प्रस्तावना

भारतीयधर्मजीवनस्य आध्यात्मिकजीवनस्य च प्राणभूता वेदाः। यथा प्राणान् विना जीवः तथा वेदान् विना धर्मादिकम्। अत एव इहामुष्किकफलविचारे वेदानां स्थानं सर्वश्रेष्ठम्। स च वेदः भगवतः निश्वासभूतः। अतः अपौरुषेयः। स वेदः चतुर्धा विभक्तो भवति। तथा हि - ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदश्चेति। तत्र ऋग्वेदस्य दशममण्डलस्य अष्टाधिकैकशततमं सूक्तं (ऋ.वे. म-१०.१०८) सरमापणिसंवादसूक्तम्। इदम् एकम् अत्यन्तं प्रसिद्धं संवादसूक्तम्। सरमापण्योः कथामाध्यमेन संवादसूक्तं प्रचलति। एवञ्च पाठे अस्मिन् सरमापणिसंवादसूक्तं उपन्यस्तम्।

उद्देश्यानि

एतं पाठं पठित्वा भवान् -

- सरमापाणिसंवादसूक्तस्य संहितापाठं पदपाठं पठिष्यति।
- सरमापाणिसंवादसूक्तस्य मन्त्राणाम् अन्वयं कर्तुं शक्तो भविष्यति।
- सरमापाणिसंवादसूक्तस्य सान्वयप्रतिपदार्थं ज्ञास्यति।
- सरमापाणिसंवादसूक्तस्य व्याख्याने योग्यो भवेत्।
- स्वयमेव मन्त्रार्थस्यापि व्याख्यानं कर्तुं प्रभवेत्।
- मन्त्रे स्थितानां केषाञ्चन शब्दानां व्याकरणं ज्ञास्यति।

२६.१) अथ मूलपाठः

किमिच्छन्ती सरमाप्रेदमानड् दूरेह्यध्वा जगुरिः पराचैः।

कास्मेहितिः का परितकम्यासीत् कथं रसाया अतरः पयांसि॥ १॥इन्द्रस्य
दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन् वः।

अतिष्कदो भियसा तन्न आवत् तथा रसाया अतरं पयांसि॥२॥

की दृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्।

आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥३॥

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात्।

न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे॥४॥

इमा गावः सरमे या ऐच्छः परि दिवो अन्तान् सुभगे पतन्ती।

कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा॥५॥

अस्येना वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः।

अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात्॥६॥

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिरवसुभिन्यृष्टः।

रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ॥७॥

एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः।

त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित्॥८॥

एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन।

स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम॥९॥

नाहं वेद भ्रातृत्वं नो स्वसृत्वम इन्दो विदुराङ्गिरसश्च घोराः।

गोकामा मे अच्छदयन्यदायम अपात इतपणयो वरीयः॥१०॥

दूरमित पणयो वरीय उद् गावो यन्तु मिनतीर्ऋतेन।

बृहस्पतिर्या अविन्दन्निगूह्ळाः सोमो ग्रावाण ऋषयश्च विप्राः॥११॥

२६.२) अथ मन्त्रव्याख्यानम्

किमिच्छन्ती सरमाप्रेदमानड् दूरेह्यध्वा जगुरिः पराचैः।

कास्मेहितिः का परितकम्यासीत् कथं रसाया अतरः पयांसि॥ १॥

पदपाठः- किम्। इच्छन्ती। सरमा। प्र। इदम्। आनट्। दूरे। हि। अध्वा। जगुरिः।

पराचैः। का। अस्मेऽहितिः। का। परिऽतक्मया। आसीत्। कथम्। रसायाः। अतरः।

पयांसि॥१॥

अन्वयः- सरमा किम् इच्छन्ती इदम् प्र आनट्। पराचैः जगुरिः अध्वा दूरे हि। का अस्मेहितिः का तरितक्म्या आसीत्। कथं रसायाः पयांसि अतरः।।१।।

अन्वयार्थः - (सरमा) इन्द्रस्य दूती सरमा नाम देवशुनी (किम् इच्छन्ती) किं कामयमाना प्रार्थयमाना वा (इदम् प्र आनट्) इदं स्थानं प्राप्नोत्? (अध्वा दूरे हि) अत्र आगमनमार्गः खलु सुदूरः, अतिदीर्घः। (पराचैः) पराञ्चनैः, सुदूरं गमनैः, बहुयोजनलङ्घनैः एव कोऽपि अत्र (जगुरिः) आगन्तुं प्राप्तुं वा शक्तः। यद्वा, योजनानि चलित्वैव इयं सरमा अत्र प्राप्ता। हे सरमे! (का अस्मेहितिः) का तव अस्मासु निहिता स्वार्थवृत्तिः? तव किं प्रयोजनम् अस्मासु आयत्तम् अत्र आगच्छन्त्याः तव (का परितक्म्या आसीत्) गतिः का अभूत्? तव परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत्। (कथं रसायाः पयांसि अतरः) रसानामकनद्या जलराशिं त्वं कथं तीर्णवती?।।१।।

व्याख्या- अनया आगच्छन्तीं सरमां दृष्ट्वा पणयो वदन्ति सरमा सरणशीला एतन्नामिका देवशुनी किं प्रार्थयमाना सती इदम् अस्मदीयं स्थानं प्रानाट् प्राप्नोत् अङ्पूर्वोनशिव्याप्तिकर्माष तस्य लुङि मन्त्रेघसेत्यादिना च्लेर्लुक् छन्दस्यापि दृश्यते इति आडागमः। पराचैः परांचि पराङ्गिखान्यावृत्तिवर्जितानि यानि गमनानि तैर्जगुरिः उद्गूर्णः महता प्रयत्नेनापि गन्तुं नशक्यत इत्यर्थः। गृ निगरणे आदृगमहनेत्यादिना किन्प्रत्ययः बहुलं छन्दसीत्युत्वं तादृशोयमध्या दूरेहि विप्रकृष्टः खलु। यद्वा पराचैः परांचनै जगुरिः अत्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सती इदं स्थानं प्राप्नोति दूरे अयमध्वा

यदृच्छयागन्तुं न शक्यते अतो वयमेतां पृच्छामः। हे सरमे का कीदृशी अस्मेहितिः कोस्मास्वर्थहितिः कोस्मासु त्वदपेक्षितार्थो निहितः यद्वा अस्मासु कोर्थो गतः दधातेर्हिनोतेर्वा क्तिनिरूपम् आगच्छंत्यास्तव का कीदृशी परितक्म्या रात्रिरासीत् यद्वा तकतिर्गत्यर्थः परितकनं परितोगमनं भ्रमणं वा कीदृशमासीत् कथं वा रसायाः शब्दायमानायाः अन्तरिक्षनद्या योजनशतविस्तीर्णायाः पयांस्युदकानि अतरः तीर्णवत्यसि एतद्वद। अत्र किमिच्छन्ती सरमेदं प्रानडित्यादि निरुक्तं द्रष्टव्यम्॥१॥

सरलार्थः - अत्र पणिः सरमां प्रति कथयति भवती किमर्थम् अत्र आगतवती। इदं तु बहुदूरं वर्तते। अत्र आगमनसमये भवती यदि पश्चाद्दिशि दृष्टिः निक्षिपेत् तर्हि अत्र आगमनम् असम्भवम् आसीत्। मम समीपे तावत् तादृशं किं वस्तु विद्यते यस्य लाभाय भवती अत्र आगतवती अस्ति। कीदृश्यां रात्रौ आगतवती। नद्याः जलं कथम् उत्तीर्णवती अस्ति।

व्याकरणम् -

- इच्छन्ती - अत्र इष्-धातोः शतृप्रत्यये स्त्रियां ङीप्-प्रत्ययः।
- आनट् इत्यत्र आङ्पूर्वस्य नशि-धातोः लुङि मन्त्रेघस- इत्यादिना च्लेः लुकि छन्दस्यपिदृश्यते इत्यनेन आडागमः।

इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन् वः।

अतिष्कदो भियसा तन्न आवत् तथा रसाया अतरं पयांसि॥२॥

पदपाठः- इन्द्रस्य। दूतीः। इषिता। चरामि। महः। इच्छन्ती। पणयः। निऽधीन्। वः।

अतिऽस्कदः। भियसा। तत्। नः। आवत्। तथा। रसायाः। अतरम्। पयांसि॥ २॥

अन्वयः- (हे) पणयः, इन्द्रस्य दूतीः (तेन एव) इषिता (अहं) वः महः निधीन् इच्छन्ती चराम्। अतिस्कन्दः भियसा तत् नः आवत्। तथा रसायाः पयांसि अतरम्।।२।।

अन्वयार्थः - हे (पणयः) एतन्नामका असुराः, जीवनस्य प्रकाशरहितानां सामान्येन्द्रियक्रियाणां शासकशक्तयः (अहम् इन्द्रस्य दूतीः) सन्देशहर्त्री, सन्देशवाहिक (इषिता) अहं तेनैव प्रेषिता (वः) युष्मदीयान्, युष्माभिरपहृत्य आनीतान् (महः निधीन्) इन्द्रस्य महानिधीन् (इच्छन्ती चरामि) वाञ्छन्ती अत्र विचरामि। (अतिस्कन्दः) आक्रमणस्य (भियसा) भयेन, अतिक्रमणात् जातेन भयेन वा (तत्) नदीजलमपि (नः) माम्, पूजायां बहुवचनम्, (आवत्) अरक्षत्। (तथा) तेन प्रकारेण अहम् (रसायाः पयांसि अतरम्) रसानद्याः जलानि तीर्णवती।।२।।

व्याख्या- अनया तान् सरमेत्यूचे हेपणाय एतन्नामकाः असुराः इन्द्रस्य दूतीः सुपांसुलुगिति प्रथमैकवचनस्य सुश्छान्दसः अहं इषिता तेनैवप्रेषिता सती चरामि युष्मदीयंस्थानमागच्छामि। किमर्थं वोयुष्मदीयान् युष्मदीयेपर्वते अधिष्ठापितवान् महोमहतः निधीन् बृहस्पतेर्गोनिधीन् इच्छन्ति

कामयमानासती चरामि। किंच अतिष्कदः स्कन्दिर्गति शोषणयोः भावेक्विप् अतिष्कन्दात् अतिक्रमणाज्जातेन भियसा भियेन तन्नदीजलं नः पूजायाः बहुवचनं मां आवत् अरक्षत्। तथा प्रकारेण रसायानद्याः पयांस्युदकानि अतरं तीर्णवत्यस्मि॥२॥

सरलार्थः - (सरमा कथयति) हे पणयः, इन्द्रस्य दूतीरूपेण अहम् आगतवती। भवान् यद् गोरूपं धनम् सञ्चितवान् अहं तद् गृहीतुम् इच्छामि। जलमेव माम् अरक्षत्। जलस्य भीतिः तु आसीदेव परन्तु तम् उल्लघ्य आगतवती।- एवमहं नदीम् उत्तीर्य अत्र आगतवती।

व्याकरणम् -

- आवत् इत्यत्र अवतेः लङि आवत् इति रूपम्।
- पयांसि-पयस्-शब्दस्य प्रथमाबहुवचने जसि प्रक्रियाकार्ये पयांसि इति रूपम्।

कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्।

आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥३॥

पदपाठः-

कीदृङ्। इन्द्रः। सरमे। का। दृशीका। यस्य। इदम्। दूतीः। असरः। पराकात्। आ। च। गच्छात्। मित्रम्। एना। दधाम। अथ। गवाम्। गोऽपतिः। नः। भवाति॥३॥

अन्वयः - (हे) कीदृङ् इन्द्रः, का दृशीका, यस्य दूतीः (त्वम्) पराकात् इदम् असरः। आ च गच्छात् (वयम्) एन मित्रं दधाम। अथ नः गवां गोपतिः भवाति।।३।।

अन्वयार्थः - हे (सरमे, कीदृङ् इन्द्रः) कीदृशः (का दृशीका) तस्य दृष्टिः कीदृशी, दृष्टिरूपा सेना कियती? तस्य लक्षणानि कानि (यस्य दूतीः) यस्य इन्द्रस्य दूतीः भूत्वा त्वम् (पराकात्) दूरदेशात् (इदम् असरः) इदं स्थानम् आगता? इति ताम् उक्त्वा इदानीं ते परस्परम् आहुः - आगच्छात् च) यदि इयं सरमा अस्माभिः सह संगच्छेत, इन्द्रं त्यक्त्वा अस्माभिः मिलिता भवेत् (अथ) तर्हि (एना मित्रं दधाम) वयम् एनां स्वमित्रं कुर्याम। (अथ) तर्हि इयम् अपि (नः गवां गोपतिः भवाति) अस्माकं गवां स्वमिनी भवेत्। अथवा स इन्द्रः अत्र आगच्छेत् चेत् वयं तेन मैत्रीं कुर्याम। अथ स इन्द्रः अस्माकं गोपतिः भवेत्।।३।।

व्याख्या- तेषां वाक्यं हे तव स्वामीइन्द्रः कीदृक् कियत्पराक्रमवान् कादृशीका तस्य कीदृशीदृष्टिः दृष्टिरूपासेनाकियती यस्य दूतीः दूती त्वं इदमस्मदीयंस्थानं पराकादतिदूरादसरः आगमः। इति तामुक्त्वा इदानीं ते परस्परमाहुः एषा सरमा आगच्छात् च आगच्छतुच गमर्लेटि आडागमः स्वामी भवति नह्येकस्यागोः किंतु बहूनां गवां स्वामी भवतु वृत्यवृत्तिभ्यां स्वामित्यं बाहुल्यंच विवक्षते॥३॥

सरलार्थः -

पणिः कथयति- यस्य इन्द्रस्य दूतिरूपेण भवती एतावद् दूरम् आगतवती सः इन्द्रः कीदृशः अस्ति। तस्य कियान् पराक्रमः कियत्यः सेनाश्च सन्ति। इन्द्रः आस्मान् रक्षतु। इन्द्रं मित्ररूपेण अङ्गीकर्तुं वयं प्रस्तुताः। स इन्द्रः अस्माकं गाः स्वीकृत्य तासाम् अधिपतिः भवतु।

व्याकरणम् -

- आचगच्छत् इत्यत्र उपसर्गस्यधातोः व्यवहितरूपेण प्रयोगः। अत्र यत् आचगच्छत् इति रूपम् तत् गम्-धातोः लेटि आडागमे प्रक्रियाकार्ये रूपम् इति।
- गवाम्-गो-शब्दस्य षष्ठीबहुवचने आमि गवाम् इति रूपम्।

पाठगतप्रश्नाः

१. किमिच्छन्ती इत्यादिवाक्यं कः कम्प्रति अकथयत्।

२. इषति इत्यस्य कोऽर्थः।

३. कस्य दूतीरूपेण सरमा आगतवती।

४. पणयः इन्द्रेभ्यः किं दातुम् अङ्गीकृतवन्तः।

५. कीदृङ् इत्यस्य कोऽर्थः।

नाहं तं वेददभ्यंदभत्सयस्येदं दूतीरसरं पराकात्।

न तं गुहन्ति स्रवतोगभीरा हता इन्द्रेण पणयः शयध्वे॥४॥

पदपाठः-

न। अहम्। तम्। वेद। दभ्यम्। दभत्। सः। यस्य। इदम्। दूतीः। असरम्। पराकात्। न।

तम्। गुहन्ति। स्रवतः। गभीराः। हताः। इन्द्रेण। पणयः। शयध्वे॥४॥

अन्वयः - अहं तं दभ्यं न वेद (अपितु) सः तभत्, यस्य दूतीः (अहम्) पराकात् इदम् असरम्। स्रवतः गभीराः तं न गूहन्ति। (हे) पणयः,हताः (यूयं) शयध्वे।।४।।

अन्वयार्थः - (अहं) सरमा (तं) इन्द्रम् (दभ्यं) दम्भनीयम् दमयितुं हिंसितुं वा शक्यं (न वेद) न जानामि, न मन्ये। (सः तभत्) अपितु स इन्द्रः अन्यान् दभ्नोति, पराजयते विनाशयति वा, सकला अपि शक्तीः वशीकरोति। (यस्य दूतीः) यस्य दौत्ये नियुक्ताऽहम् (अहम्) सरमा (पराकात्) अतिदूरदेशात्,

परतरलोकात्, इन्द्रियागोचरसमुच्चस्तरात् (इदम् असरम्) इदं युष्मदीयं स्थानं प्राप्ता। (स्रवतः गभीराः) गम्भीराः स्रोतोवहा अपि (तं न गूहन्ति) तम् इन्द्रं न प्रच्छादयन्ति गोपयन्ति वा प्रत्युत तम् आविष्कुर्वन्ति, वयं तस्य महिम्ना समुद्रं प्रति सराम इति वदन्त्यः ताः 'अयम् अदमनीय' इति प्रकटीकुर्वन्ति। तस्मात् हे (पणयः) इन्द्रियभोगैकपरायणा असुराः! (इन्द्रेण हताः) निहताः, निपातिताः यूयं (शयध्वे) धराशयिनः भविष्यथ।।४।।

व्याख्या- सरमावदति हे पणयः तमिन्द्रं दभ्यं हंतव्यं नवेद नजानामि दभेश्चोरयत् कथं सइन्दः दभत् सर्वाञ्चनान्दभति हिनस्त्येव दभेर्लेटिरूपं वाक्यभेदादनिघातः यस्यदूतीः अहं इदं युष्मदीयं स्थानं पराकात् अतिदूरदेशात् असरं प्राप्ताभूवं। इन्द्रोहिंसितव्योनभवतीत्यत्र युक्तिमाह स्रवतः स्रवणं स्रवः तमाचरन्ति आचारार्थेक्विप् तुगागमः जसिरूपं स्रवणशीलाः गभीरा गंभीरानद्यः तं इन्द्रं नगूहन्तिनसंवृण्वन्ति नाच्छादयन्ति। किंतु आविष्कुर्वन्ति वयं यस्य महिम्ना समुद्रं प्रतिसरामस्तस्मादहिंस्यइति एनं प्रकटीकुर्वन्ति। गुहूसंवरणे भौवादिकः। तस्मात् हे पणयोयूयं इन्द्रेण तादृशपराक्रमेणहताः सन्तः शयध्वे शीङ्स्वमे बहुलंछन्दसीति शपोलुगभावः॥४॥

सरलार्थः -

सरमा कथयति- यस्य इन्द्रस्य दूतिरूपेण अहम् अत्र आगतवती तं कोऽपि पराजेतुम् असमर्थः। स इन्द्र एव सर्वान् पराजयति। प्रखराः गम्भीराः नद्योऽपि तस्य वेगं रोद्धुम् असमर्थाः। हे पणयः यूयम् अपि इन्द्रस्य तादृशपराक्रमेण आहताः सन्तः शयनं करिष्यथ इति।

व्याकरणम् -

- स्रवतः-स्रवतेः आचारार्थे क्विपि तुगागमे जसि प्रक्रियाकार्ये स्रवतः इति रूपम्।
- शयध्वे इत्यत्र बहुलं छन्दसि इति शपः लुगभावः।

इमा गावः सरमे या ऐच्छः परिदिवो अन्तान् सुभगे पतन्ती।

कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा॥५॥

पदपाठः- इमाः। गावः। सरमे। याः। ऐच्छः। परि। दिवः। अन्तान्। सुऽभगे। पतन्ती। कः। ते। एनाः। अव। सृजात्। अयुध्वी। उत। अस्माकम्। आयुधा। सन्ति। तिग्मा॥५॥

अन्वयः - (हे) सुभगे सरमे, दिवः अन्तान् परि पतन्ती इमाः गावः याः (त्वम्) ऐच्छः, एनाः ते कः अयुध्वी अव सृजात्। उत अस्माकम् आयुधा तिग्मा सन्ति।।५।।

अन्वयार्थः - 'नाहं तं वेद दभ्यं दभत् सः....हता इन्द्रेण पणयः शयध्वे ' इति श्रुत्वा क्रुद्धाः पणयः प्रत्यवदन्-

(सुभगे सरमे) हे सौभाग्यशालिनि सुन्दरि सरमे (दिवः अन्तान्) आकाशस्य एकस्मात् प्रान्तात् अन्यप्रान्तान् यावत् (परिपतन्ती) परितो गच्छन्ती पर्याकुलं भ्रमन्ती वा ताः प्राप्तुम् (इमाः गावः) एताः सन्ति ता गावः (याः) अन्वेषयन्ती त्वम् (ऐच्छः) कामयसे। (एनाः) एताः गाः (कः अयुध्वी) कः खलु अयुद्ध्वा, विना युद्धम् (ते अव सृजात्) तुभ्यं त्यक्तुमर्हति। (उत) अपि च (अस्माकम् आयुधा तिग्मा सन्ति) अस्माकमपि तीक्ष्णानि शस्त्राणि सन्ति। तस्माद् अस्माभिः सह युद्धम् अकृत्वा को वा गा नयति।। ५।।

व्याख्या- क्रुद्धाः पणयः प्रत्यूचुः हे सुभगे शोभनभाग्यवति हेसरमे दिवः द्युलोकस्य. अन्तान् पर्यन्तान् परिपतन्ती कुत्रगावस्तिष्ठन्तीति परिगच्छन्ती त्वं इमाः परिदृश्यमानाः याः गावः सुबव्यत्ययः गाः ऐच्छः कामयसे ताः एनाः गाः ते त्वदीयः कः अयुध्वी अयुध्वा अवृजात् अस्मात्पर्वतादसृजेत् विनिर्गमयेत् विनिर्गमयेत्। सृजेर्लेटिरूपं अयुध्वी युधेःक्त्वाप्रत्यये स्नात्वादयश्चेति निपातितः नञ्समासत्वात्ल्यबादेशभावः नञघःप्रकृतिस्वरत्वंच उतापिच अस्माकं तिग्मा तीक्ष्णान्यायुधा आयुधानि सन्ति तस्मादस्माभिर्युद्धमकृत्वा कोवागाआहरति॥५॥

सरलार्थः - पणयः उक्तवन्तः- हे सुन्दरि सरमे त्वं स्वर्गस्य आन्तिमप्रदेशात् आगतवती अतः मम गवां मध्ये यां यां भवती इच्छति तां ताम् अहं तुभ्यं दातुं शक्नोमि। परन्तु युद्धं विना कः तुभ्यं गाः दास्यति। मम समीपे अपि बहूनि तीक्ष्णानि आयुधानि सन्ति।(अर्थात् अहम् अपि योद्धुं समर्थः अस्मि इत्यर्थः)।

व्याकरणम् -

- अवसृजात्- अवपूर्वकात् सृज्-धातोर्लेटि प्रक्रियायाम् अवसृजाद् इति रूपम्।
- अयुध्वी- युध्-धातोः क्त्वाप्रत्यये स्नात्व्यादयश्च इत्यनेन निपाते नञ्समासत्वात् क्त्वाप्रत्ययस्य ल्याबादेशाभावे प्रक्रियाकार्ये अयुध्वी इति रूपम्।

अस्येनाव॒ः पणयो वचांस्यनिषव्यास्तन्व॒ः सन्तु पापीः।

अधृष्टोव एतवा अस्तु पन्था बृहस्पतिर्व उभय न मृळात्॥६॥

पदपाठः- असेन्या। वः। पणयः। वचांसि। अनिषव्याः। तन्वः। सन्तु। पापीः।

अधृष्टः। वः। एतैव। अस्तु। पन्थाः। बृहस्पतिः। वः। उभया। ना। मृळात्॥६॥

अन्वयः - (हे) पणयः, वः वचांसि असेन्या। (युष्माकम्) पापीः तन्वः अनिषव्याः सन्तु, वः पन्थाः एतवै अधृष्टः अस्तु। (किन्तु)बृहस्पतिः वः उभया न मृळात्।।६।।

अन्वयार्थः - हे (पणयः) आध्यात्मिकप्रकाशस्य, दिव्यसत्यस्य दिव्यविचारस्य च शत्रवः पणिनामकदस्यवः! (वः वचांसि) युष्माकम् इमानि पूर्वोक्तवचनानि (असेन्या) असेन्यानि, न सेनायोग्यानि, अस्मत्सेनानां सम्मुखं व्यर्थानि सेत्स्यन्ति इति भावः। युष्माकम् (पापीः तन्वः) पापिशरीराणि कामम् (अनिषव्याः सन्तु) इषुभिः प्रभावितानि न स्युः, यद्वा कामं पापयुक्ततया पराक्रमरहितानि तानि इषुयोग्यानि एव न स्युः, कामं (वः) युष्मान् (पन्थाः) मार्गः (एतवै) उपगन्तुं (अधृष्टः अस्तु) अधर्षणीयः, दुर्गमः स्यात्, क्षुण्णः परिचितो वा न स्यात्। (बृहस्पतिः वः उभया न मृळात्) किन्तु बृहस्पतिदेवता युष्मभ्यम् उभयोः भूलोकस्वर्गलोकयोः किमपि सुखं नैव दास्यति, युष्माकं किमपि कल्याणं न करिष्यति।।६।।

व्याख्या- सा तां निराह हे पणयः वोयुष्माकं वचांसि पूर्वोक्तानि वचनान्यसेना असेन्यानि सेन्यानि सेनार्हाणि नभवन्ति सेनाशब्दात्तदर्हतीत्यर्थेछन्दसिचेति यत्प्रत्ययः नञःसमासः। ययतोश्चातदर्थइति उत्तरपदान्तोदात्तत्वं। तथा तन्वः युष्मदीयानि शरीराणि अनिषव्याः इष्वार्हाणि न सन्तु पराक्रमराहित्येन पूर्ववत्प्रत्ययः ओर्गुणइतिगुणः स्वरश्चतादृक्। यतः पापीः पापयुक्तानिखलु छन्दसीवनिपावितीप्रत्ययः। जसःशः किंच वोयुष्मदीः पंथामार्गः एतवै गन्तुं अधृष्टः असमर्थोस्तु इणगतावित्यस्य तुमर्थेतवैप्रत्ययः तवैचान्तश्चयुगपदिति-धातोः प्रत्ययान्तस्य युगपदुदात्तत्वं तत्र हेतुमाह वोयुष्मादीयान् उभया उभयविधान् पूर्वोक्तान्त्वोदेहान् बृहस्पतिरिन्द्रप्रेरितोनमृळात् नसुखयतु किंतु बाधेत मृडसुखने लेट्याडागमः॥६॥

सरलार्थः - सरमा- भवतां वचनं सैनिकोचितं नास्ति। भवतां शरीरे पापं विद्यते। इदं शरीरं कदापि इन्द्रस्य बाणस्य लक्ष्यं भवेत् न वेति, देवताः कदापि भवताम् उपरि आक्रमणं कर्युः न वेति। मम संशयः पश्चात् वृहस्पतिः भवते क्लेशं प्रदास्यति। यदि भवान् गाः न दास्यति तर्हि विपद् सन्निकटे एव वर्तते।

व्याकरणम् -

- असेन्या- सेना-शब्दात् तदर्हतीत्यर्थे छन्दसि च इति यत्प्रत्ययः, नञ्समासश्च। अत्र ययतोश्चातदर्थे इति उत्तरपदान्तोदात्तत्वम्।
- एतवै इत्यत्र इण् गतौ इति गत्यर्थक-इण्-धातोः तुमर्थे तुमर्थे से-सेनसेऽसेन्-क्से-क्सेनध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः इत्यनेन तवैप्रत्ययः। अत्र तवै चान्तश्च युगपद् इतिधातोः प्रत्ययान्तस्य युगपद् उदात्तत्वम्।

पाठगतप्रश्नाः

६. कं कोऽपि पराजेतुं न शक्नोति।

७. दभत् इत्यत्र दभ्धातुः किमर्थकः।

८. किं विना पणयः गाः दातुं नैच्छन्।

९. सुभगशब्दस्य कोऽर्थः।

१०. कस्य वचनं सैनिकयोग्यं नास्ति।

११. वृहस्पतिः पश्चात् कस्मै क्लेशं दास्यति इति सरमा आशङ्कते।

अयं निधिःसरमे अद्रिबुध्नो गोभिरश्वेभिरवसुभिन्यृष्टः।

रक्षन्ति तं पणयो ये सुगोपा रेकु पदमलकमाजगन्थ॥७॥

पदपाठः- अयम्। निऽधिः। सरमे। अद्रिऽबुध्नः। गोभिः। अश्वेभिः। वसुऽभिः। निऽऋष्टः। रक्षन्ति। तम्। पणयः। ये। सुऽगोपाः। रेकु। पदम्। अलकम्। आ। जगन्थ॥ ७॥

अन्वयः - सरमे गोभिः अश्वेभिः वसुभिः न्यृष्टः अयं निधिः अद्रिबुध्नः तं पणयः रक्षन्ति ये सुगोपाः अलकम् रेकु पदम् आ जगन्थ ।

अन्वयार्थः - हे (सरमे) इन्द्रस्य दूति (गोभिः अश्वेभिः वसुभिः) धेनुभिः, अश्वैः अन्यैश्च ऐश्वर्यैः (न्यृष्टः) परिपूर्णः (अयं निधिः) एष नः कोषः (अद्रिबुध्नः) अद्रिः पर्वतः बुध्नः दृढाधारः, सुदृढम् आश्रयस्थानं यस्य तादृशः अस्ति, अयं पर्वतगुहाभ्यन्तरे गुप्ततया सुरक्षिततया च संवृत इत्यर्थः। (तम्) पूर्वोक्तं निधिं (पणयः) पणिनामकदस्यवः (रक्षन्ति) परिपान्ति (ये) पणयः (सुगोपाः) श्रेष्ठा रक्षकाः। अतः त्वं (अलकम्) व्यर्थमेव (रेकु पदम्) शङ्काकुलं स्थानम् (आ जगन्थ) आगता।

आध्यात्मिकतात्पर्यम् - अस्मिन् मन्त्रे यो निधिः सङ्केतितः स वर्तते इन्द्रस्य दिव्यैश्वर्यकोषः, -अस्माकमात्मनः तदीयदिव्यपवित्रमनसश्च गावः, दिव्योषसः दिव्यस्य सत्यसूर्यस्य च चिद्रश्मयः, तस्य अश्वा अध्यात्मप्रकाशशक्तयः, तस्य वसूनि च सन्ति तेषां रश्मीनां तासां शक्तीनां च फलभूतानि शान्त्यानन्दादीनि अन्यानि ऐश्वार्याणि।

पणयः सन्ति अनृतस्य अज्ञानस्य च कुटिलशक्तयः, प्रकाशरहितानां सामान्येन्द्रियक्रियाणां शासकशक्तयः। एभिः पणिभिः अस्माकं दिव्यैश्वर्याणि भौतिकसत्तायाः पर्वते, देहाद्रेः गुहायाम् अन्धकारमयाऽवचेतनभौतिकसत्तायां प्रच्छन्नतया स्थापितानि।

सरमा वर्तते इन्द्रस्य अन्तर्ज्ञानशक्तिः। इन्द्रेण प्रेरिता सा अस्माकं प्रच्छन्नमैश्वर्यम् अस्मान् प्रापयति। पणिसरमासंवादस्य इयं पृष्ठभूमिः प्रस्तुतमन्त्रे सुस्पष्टं निर्दिष्टा। विस्तरार्थम् अस्य सूक्तस्य अन्ते उपन्यस्तम् आध्यात्मिकव्याख्यानमनुशीलनीयम्।।७।।

व्याख्या- ते च पुनराहुः हे सरमे अयं निधिः अस्मदीयः कोशः अद्रिबुध्नः बन्धबन्धने बन्धेर्बधिबुधीचेति न प्रत्ययः बुध-इत्यादेशः अद्रिबन्धको यस्य तादृशः तथा आहृतैः गोभिः अश्वेभिः

अश्वैश्च वसुभिरात्मीयैः धनैश्च न्यृष्टः नितरां प्राप्तो भवति। ऋषी गतौ क्तप्रत्यये श्वीदितो निष्ठायाम् इति इट्प्रतिषेधः। गतिरनन्तर इति गतेः प्रकृतिस्वरत्वं सुगोपाः गुपू रक्षणे आयप्रत्ययान्तात्क्विपि आतो लोपयलोपौ सुष्ठु गोपायितारोयेपणयः ते असुराः तं निधिं रक्षन्ति पालयन्ति। रेकु रेकृशंकायाम् औणादिकउप्रत्ययः शंकितं गोभिः शब्दायमानं पदम् अस्माभिः पालितं स्थानम् अलकं व्यर्थमेव आजगन्थ आगतवत्यसि। गमेर्लेटि रूपम्।

सरलार्थः - पणयः अकथयन्- हे सरमे मम सम्पत्तिः पर्वतैः सुरक्षिता विद्यते तथा गोभिः अश्वैः आन्यान्यधनैश्च परिपूर्णा विद्यते। पुनश्च अस्याः सम्पत्तेः रक्षाकार्यं पणयः एव निर्वहन्ति। अतः भवत्याः अत्र आगमनं व्यर्थम् अस्ति।(अर्थात् इन्द्रस्य भीतिं प्रदर्श्य अस्माकं सकाशात् गाः प्राप्तुं भवती असमर्था अस्ति इति।)

व्याकरणम् -

- अद्रिबुध्नः इत्यत्र बन्ध बन्धने इतिधातोः नप्रत्यये बन्ध-इत्यस्य बुध-इत्यादेशः।
- ऋषी गतौ इतिधातोः क्तप्रत्यये श्वीदितो निष्ठायाम् इति इट्प्रतिषेधः।

एह ग॑म॒न्नृष॑य॒ः सोम॑शिता अ॒यास्यो॒ अङ्गि॑रसो॒ नव॑ग्वाः।

त ए॒तमू॒र्वं विभ॑जन्त॒ गोना॒मथै॒तद्वचः॑ प॒णयो॒ वम॒न्नित्॥८॥

पदपाठः- आ। इ॒ह। ग॒म॒न्। ऋष॑यः। सोम॑ऽशिताः। अ॒यास्यः॑। अङ्गि॑रसः। नव॑ऽग्वाः।

ते। ए॒तम्। ऊ॒र्वम्। वि। भ॒ज॒न्त॒। गोना॑म्। अथ॑। ए॒तत्। वचः॑। प॒णयः॑। वम॑न्। इत्॥८॥

अन्वयः -

सोमशिताः अयास्यः अङ्गिरसः नवग्वाः ऋषयः इह आ गमन्। ते एतं गोनाम् ऊर्वं वि भजन्त। अतः एतत् वचः पणयः वमन् इत्।।८।।

अन्वयार्थः - हे (सोमशिताः) सोमेन आनन्दरसपानेन शिताः तीक्ष्णीकृताः, प्रदीप्ततेजसः (अयास्यः) सत्यात् जातायाः सप्तशीर्षधियः आविष्कर्ता ऋषिश्च (अङ्गिरसः ऋषयः) दिव्याग्नेः पुत्राः, तस्य शक्तिरूपाश्च दिव्यद्रष्टारः तेषां भूलोकगताः प्रतिनिधयः मनुष्यणां पूर्वे पितरश्च (नवग्वाः) ये नव मासान् अन्तर्यज्ञं कृत्वा परमज्योतिषः सत्यसूर्यस्य च नव रश्मीन् प्राप्तवन्तः ते (इह आ गमन्) अत्र युष्माकम् अद्रिगुहाम् आगमिष्यन्ति। (ते) सर्वेऽपि पूर्वोक्ता ऋषयः (एतं गोनाम् ऊर्वं) इमं गवां व्रजं (वि भजन्त) विवृत्य, उन्मुच्य तासां गवां विभजनम् उपभोगं च करिष्यन्ति। (अथ) तदा यूयम् (एतत् वचः) इदं वचनम्, 'व्यर्थमेव त्वम् इदं शङ्काकुलं स्थानम् आगता' इत्येवंरूपं वाक्यं (पणयः) अध्यात्मप्रकाशस्य शत्रवः, प्रकाशगवाम् अपहर्तारः गोप्तारश्च पणिनामकदस्यवः! (वमन् इत्) परित्यक्ष्यथ एव। अतः वरं गर्वपूर्णवचनानां परित्यागः।।८।।

व्याख्या- सरमा पुनः प्रत्युवाच हे पणयः सोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः शिञ्निशाने कर्मणि क्तप्रत्ययः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। तादृशानवग्वाः नवगतयः यद्वा अंगिरसां सत्रमासीनानां मध्ये केचन नवसु माःसु अध्यतिष्ठन् ते नवग्वाः अनेन दृशग्वाअप्युपलक्ष्यन्ते। उभयवधास्ते अंगिरस-ऋषयः तेषां प्रथमोयास्यः एतन्नामाच ते एते इह युष्मदीये स्थाने आगमन् आगच्छेयुः। गमेश्छन्दसि लुङ्लङ्लिट इति सार्वकालिको लुङ् लृदित्वात् च्लेः अङ्। आगत्यच ते गोनां गोःपादान्त इति छन्दसि नुडागमः गवाम् ऊर्वन्तं समूहं विभजन्त विभागं कुर्युः अत्रापि पूर्ववत्सार्वकालिको लुङ्। अथान्तरं पणयोयूयं एतद्वचः पूर्व्यं यद्व्यर्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदावमन्नित् वमन्तः परित्यजन्त एव भवथ। वमु उद्गिरणे शतरि सुपां सुलुक् इति जसो लुक् नुमागमः संयोगान्तलोपः यद्वा लङि रुपं स्वरश्छान्दसः।

सरलार्थः - सरमा कथयति- सोमपानेन प्रमत्ताः अङ्गिरसाः नवगुणाश्च अत्र आगत्य एताः गाः भवतां सकाशात् मोचयित्वा नेष्यन्ति। हे पणयः तस्मिन् समये भवतां एषा दर्पोक्तिः परित्यज्या भविष्यति। (तदा भवान् किमपि कर्तुम् असमर्थः इति भावः।)

व्याकरणम् -

- सोमशिताः- अत्र शिञ् निशाने इतिधातोः कर्मणि क्तप्रत्ययः। तृतीया कर्मणि इति सूत्रेण अत्र पूर्वपदप्रकृतिस्वरः।
- आगमन् इत्यत्र गमेः छन्दसि लुङ्लङ्लिटः इति सूत्रेण सार्वकालिकः लुङ्। अत्र लृदित्वात् च्लेः अङ्।
- गोनाम् इत्यत्र गोः छन्दसि नुडागमः।

पाठगतप्रश्नाः

१२. पणीनां सम्पत्तिः कथं रक्षिता।

१३. पणीनां सम्पत्तिः कैः परिपूर्णा।

१४. केन अङ्गिरसाः नवगुणाश्च प्रमत्ताः।

१५. अङ्गिरसाः नवगुणाश्च किं साधयिष्यन्ति।

१६. सोमशिताः इति शब्दस्य कोऽर्थ।

एवाच त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन।

स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम॥९॥

पदपाठः- एव। च। त्वम्। सरमे। आऽजगन्थ। प्रऽबाधिता। सहसा। दैव्येन। स्वसारम्। त्वा। कृणवै। मा। पुनः। गाः। अप। ते। गवाम्। सुऽभगे। भजाम॥९॥

अन्वयः -

(हे) सरमे, दैव्येन सहसा प्रबाधिता एव त्वं च आजगन्थ, त्वा स्वसारं कृणवै। पुनः मा गाः। (हे) सुभगे गवां ते अप भजाम।।९।।

अन्वयार्थः - हे (सरमे) हे इन्द्रदूति, देवशुनि। (दैव्येन सहसा) इन्द्रादिदेवानां बलेन (प्रबाधिता एव त्वं) प्रेरिता विवशीकृता च त्वम् अत्र (च आजगन्थ) आगता। च इति पादपूरणः (त्वा स्वसारं कृणवै) वयम् त्वां स्वभगिनीम्, भगिनीवत् सहयोगिनीं कुर्मः करवामहै वा। (पुनः मा गाः) त्वम् मा प्रतिगच्छ। हे (सुभगे) हे सौभाग्यशालिनि, शोभनैश्वर्ययुक्ते, सुन्दरि सरमे (गवां ते अप भजाम) गवां भागं वयं तुभ्यमपि ददाम, अथवा तव गवां यूथं वयं त्वया सह विभजाम।।९।।

व्याख्या- व्याख्या-तया एवमुक्तेसति पणयः पणयवाक्यमाहुः हे सरमे त्वं दैव्येन देवसंबन्धिना सहसा बलेन प्रबाधिता यथातथा वलपुरं प्राप्य तत्रस्थितागादृष्टा पुनरागच्छति तेन प्रपीडिता त्वंएवंचेत् आजगन्थ आगतवत्यसि चशब्दश्चदर्थे निपातैर्यद्यदिहन्तेतिङोनिघाताभावः गमेर्लिटिथलिरूपं सहसुपेत्यत्र सहेतियोगविभागात् समासः तिङ्चोदात्तवर्तीति गतेर्निघातः नित्स्वरः तर्हि त्वा त्वां स्वसारं भगिनीं कृणवै करवै समूहापेक्षयैकवचनं त्वंतु पुनः मागाः इन्द्रादीनमागच्छ अपि तर्हि हे सुभगे सरमे ते त्वदीयानां गवांसमूहः पर्वतादपगमय्य भजाम त्वंच वयंच विभजाम विभागं करवामेत्यर्थः

सरलार्थः - पणिगणः प्रत्युत्तरति- हे सरमे, देवाः मत्तः भीतिम् आशङ्क्य भवतीम् अत्र प्रेषितवन्तः, एतदर्थमेव भवती अत्र आगतवती अस्ति। भवती अस्माकं भगिनीस्वरूपा अस्ति। भवती इदानीं न प्रतिगच्छतु यावत्कालं शक्यम् अत्रैव निवसतु। अस्माकं गोधस्य भागमपि स्वीकरोतु इति।

व्याकरणम् -

- आजगन्थ इत्यत्र आ-पूर्वकात् गम्-धातोः लिटि थलि प्रक्रियायां जगन्थ इति रूपम्। आपूर्वकाद् गमतेः सह सुपा इत्यत्र सह इति योगविभागात् समासः। अत्र तिङि चोदात्तवतीति गतेर्निघातः नित्स्वरश्च।
- स्वसारम् इत्यत्र स्वसृशब्दस्य द्वितीयैकवचनान्तं रूपम्।

नाहं वेद भ्रातृत्वं नो स्वसृत्वम इन्दो विदुराङ्गिरसश्च घोराः।

गोकामा मे अच्छदयन्यदायम अपात इतपणयो वरीयः॥१०॥

पदपाठः- न। अहम्। वेद। भ्रातृत्वम्। नो। इति। स्वसृऽत्वम्। इन्द्रः। विदुः। अङ्गिरसः। च। घोराः। गोऽकामाः। मे। अच्छदयन्। यत्। आयम्। अप। अतः। इत। पणयः। वरीयः॥१०॥

अन्वयः - अहं भ्रातृत्वं न वेद। नो स्वसृत्वम्। इन्द्रः घोराः अङ्गिरसश्च विदुः। यत् (अहम्) आयम् (ते) मे गोकामाः अच्छदयन्। अतः(हे) पणयः वरीयः अप इत।।१०।।

अन्वयार्थः - (अहं भ्रातृत्वं न वेद) हे पणय, नाहं भ्रातृत्वं जानामि। (नो स्वसृत्वम्) नापि भगिनीत्वम्। अथवा न अहं युष्माकं भ्रातृत्वम् अनुजानामि स्वीकरोमि वा न च स्वीयं स्वसृत्वम्। इदं तु (इन्द्रः घोराः अङ्गिरसश्च विदुः) इन्द्रः, शत्रूणां भयङ्कराः अङ्गिरसः च जानन्तु अनुजानन्तु वा। (यत् आयम्) येन अहं युष्मत्स्थानम् आगता। अथवा (गोकामाः) गाः प्रकाशधेनूः कामयन्ते इति गोकामाः, ज्योतिः गवाम् अभिलाषिणः इन्द्रादयः (मे अच्छदयन्) मां स्वरक्षाकवचेन आच्छाद्य अत्र प्रैषयन्, (अतः) अस्मात्कारणात् यूयम् हे (पणयः अप इत) अस्मात् स्थानात् सुदूरं गच्छत। तदेव युष्मभ्यम् (वरीयः) वरतरं स्यात्।।१०।।

व्याख्या- सा तान्प्रत्याचष्टे हे पणयः अहं भ्रातृत्वं नवेद न जानामि। तथा स्वसृत्वं च नो वेद नैव जानामि। के जानन्ति तान् आह इन्द्रः घोराः शत्रूणां भयंकराः अंगिरसश्च वदुर्जानन्ति किंच अस्मात् स्थानात् अहं यद्यादयं इन्द्रादीन् प्रामवम् अयपयगतौ लङि रूपं तदा मे मदीया गोकामाः युष्माभिरपहृता गावः कामयमाना इन्द्रादयः अच्छदयन् युष्मदीयं स्थानं आच्छदयन्ति। छद अपवारणे अतः कारणात् हे पणयो वरीयः उरुतरं गवावृन्दं परित्यज्य अपेत अन्यत्स्थानं प्रतिगचछत। यद्वा वरीयः प्रभूतं अतिदूरं देशं गच्छत। इत इण्गतौ लोटि रूपं वरीयः उरुशब्दादीयसुनि प्रियस्थिरेत्यादिनावरादेशः॥१०॥

सरलार्थः - सरमा वदति- अहं भ्रातृभगिनीकथां नावगच्छामि। इन्द्रः तथा पराक्रमिणः अङ्गिरो वंशीयाः जानन्ति यत् गवां प्राप्त्यर्तं रक्षापूर्वकं ते माम् अत्र प्रेषितवन्तः। अहं तेषाम् आश्रयं भजमाना अत्र आगतवती। अतः हे पणयः कथयामि इतः बहुदूरं पलायतु इति।

व्याकरणम् -

- आयम् इति अय गतौ इतिधातोः लङि छन्दसि रूपम्।
- इण् गतौ इतिधातोः लोटि प्रथमपुरूषद्विवचने प्रक्रियाकार्ये इतः इति रूपम्।

दूरमित पणयो वरीय उद् गावो यन्तु मिनतीर्ऋतेन।

बृहस्पतिर्या अविन्दन्निगूह्ळाः सोमो ग्रावाण ऋषयश्च विप्राः॥११॥

पदपाठः- दू॒रम्। इ॒त। प॒ण॒यः॒ ौ। वरी॑यः। उत्। गावः॑। य॒न्तु॒। मि॒न॒तिः। ऋ॒तेन॑।

बृ॒ह॒स्पतिः॑। याः। अवि॑न्दत्। निऽगू॑ह्ळाः। सोमः॑। ग्रावा॑णः। ऋष॑यः। च॒। विप्राः॑॥

११॥

अन्वयः - (हे) पणयः (यूयं) वरीयः दूरम् इत। गावः ऋतेन मिनतीः उत् यन्तु। निगूळ्हाः याः (गाः) बृहस्पतिः अविन्दत् सोमः ग्रावाणः विप्राः ऋषयः च (अविन्दन्)।।११।।

अन्वयार्थः - हे (पणयः) हे पणिनामका असुराः, जीवनस्य सामान्य-प्रकाशरहित-इन्द्रिय-क्रियाणां शासका दस्यवः! यूयं (वरीयः दूरम् इत) दूरम् वरतरं प्रशस्ततरं च स्थानं प्रति गच्छत, यद्वा इतः अतिदूरं पलायध्वम्, शुभम् इच्छथ चेत्। (गावः) अन्तर्ज्योतिषो रश्मयः (ऋतेन) सत्येन (मिनतीः) गुहाद्वारं विदारयन्तः अज्ञानान्धकारं विनाशयन्तश्च (उत् यन्तु) अवचेतनस्य निम्नतमगुहायाः पातालाद् वा ऊर्ध्वम् उद्गच्छन्तु। यद्वा (मिनतीः) युष्माभिः अवरुद्धाः, बन्दीकृता बाध्यमानाः च (गावः) (गावः) (ऋतेन) सत्यस्य तेजसा शक्त्या वा, सत्यवाणीम् उच्चारयन्त्यः वा (उत् यन्तु) चेतनापातालाद् बहिरायान्तु। (निगूळ्हाः याः) याः प्रच्छन्ना गाः (बृहस्पतिः) सर्जनशीलाऽन्तर्वाण्या अधिपतिः देवो बृहस्पतिः (अविन्दत्) अन्वैषयत् (सोमः) आनन्दामृतत्वयोः अधिपतिः सोमदेवः, (ग्रावाणः) सोमरसनिष्पीडकशक्तयः, (विप्राः ऋषयः च) ज्ञानप्रदीप्ता द्रष्टारश्च अविन्दन् अन्वेषितवन्तः अचिरं प्राप्स्यन्ति च इति भावः।।११।।

व्याख्या- हे पणयः यूयं वरीय उरुतरं दूरदेशम् इत गच्छत्। युष्माभिरपहृता गावः ऋतेन सत्त्वेन मिनतीः मिन्यतः द्वारस्य पिधायकं पर्वतं हिंसस्योवदारयन्यः उद्यन्तु तस्मादुद्गच्छन्तु।यद्वा मिनतीः व्यत्ययेन कर्मणिशता।मियमाना युष्माभिः बाध्यमानास्तागावः सुबव्यत्ययः गाऋतेन स्तुतिभिर्गन्तव्येनेन्द्रेण सहायेन बृहस्पत्यादयउद्यन्तु पर्वतादुद्गमयन्तु निगूढा नितरांस्पापितायाःगाः बृहस्पतिः अविन्दत् लप्स्यते। तथा सोमः तदभिषवकारिणोग्रावाणश्च विप्रामेधाविनऋषयः अंगिरसश्च लप्स्यन्ते। विद्लृ लाभे तौदादिकः तस्माच्छन्दसि लुङ्लङ्लिट इति भविष्यदर्थे लङ् शे मुचादीनामिति नुमागमः॥११॥

सरलार्थः -

हे पणयः इतः दूरदेशं गच्छत। गावः क्लेशं प्राप्नुवन्ति। युष्माभिरपहृताः गावः कस्मिन् गुप्तस्थाने सन्ति इति इन्द्रः, बृहस्पतिः, सोमेन अभिषवकारिणः ग्रावाणः, ऋषयः अङ्गिरसश्च ज्ञातवन्तः।(अर्थात् एते अत्र आगमिष्यन्ति अतः भवन्तः इतः दूरदेशं पलायन्तु।)

व्याकरणम् -

- अविन्दत्- अत्र तुदादिगणीयाद् विद्लृ लाभे इतिधातोः छन्दसि लुङ्लङ्लिटः इति सूत्रेण भविष्यदर्थे लङि अडागमे शेमुचादीनामिति नुडागमे प्रक्रियाकार्ये अविन्दत् इति रूपम्।

पाठगतप्रश्नाः

१७. पणिगणः कां भगिनीस्वरूपत्वेन मनुते।

१८. आजगन्थ इत्यस्य कोऽर्थः।

१९. सरमां पणिगणसकाशं के प्रेषितवन्तः।

२०. अपहृताः गावः कस्मिन् गुप्तस्थाने सन्ति इति के ज्ञातवन्तः।

२१. इन्द्रादिभ्यः स्वात्मानं रक्षणाय सरमा पणिभ्यः किमुदेशं दत्तवती।

२६.३) सरमापणिसंवादसूक्तस्य सारः

वैदिकसाहित्ये ऋग्वेदः चतुर्षु वेदेषु एव अत्यन्तं प्रसिद्धः। तत्र ऋग्वेदस्य दशममण्डलस्य अष्टाधिकैकशततं सूक्तं सरमापणिसंवादसूक्तम्। वैदिकमन्त्राः क्लिष्टतया विद्यन्ते। अत्र सरमापण्योः मध्ये गोः विषये जातां कथां समाश्रित्य अत्यन्तं सरलतया संवादसूक्तमिदं निर्मितम् अस्ति। घटना इयमपि अत्यन्तं लोकप्रसिद्धा विद्यते।

पणिः कश्चित् क्रुरः राक्षसः विद्यते। पणिः देवतानां सर्वाः गाः चोरितवान्। सर्वे प्रायः गोः अन्वेषणाय तत्पराः भवन्ति। एकदा बृहस्पतिः इन्द्रस्य सभां प्रति समागत्य ज्ञापितवान् यत् पणिनामकः कश्चित् असुरः गाः चोरितवान् अस्ति। पुनश्च रसानामकनद्याः पार्श्वे विद्यमानस्य पर्वतस्य गुहायाम् अत्यन्तं गुप्ततया गाः स्थापितवान्। वृत्तान्तं ज्ञात्वा सरमानामिकां काञ्चित् रमणीं दूतत्वेन पणेः सकाशं प्रेषितवान्। अत्यन्तं कष्टेन सरमा पणेः सकाशं गतवान्। ततःपरं पणिरपि प्रश्नम् अकरोत् यत् किमर्थं स्वर्गलोकात् इयं सुन्दरी अत्र आगतवती। सरमा उत्तरितवती यत् देवाः गोः विषये सर्वं वृत्तान्तं ज्ञातवन्तः। अतः हे पणे इतः गच्छतु गाञ्च प्रत्यर्पयतु। पणिः सगर्वेण कथयामास यत् मम रक्षणाय बहवः कर्मचारिणः नियुक्ताः सन्ति। अत एव गाः स्वीकर्तुं देवाः आयान्ति चेत् तेषामेव पराजयो भवेत्। यदि भवतीम् इन्द्रलोकात् परित्यक्तवान् अस्ति तर्हि अस्माकं भगिनीत्वेन अत्र तिष्ठतु। एतत् सर्वम् आकर्ण्य सरमा उक्तवती यत् हे पणे मम चिन्तां मा करोतु, स्वकीयजीवनस्य रक्षणाय गाः प्रदाय इतः शीघ्रं गच्छतु। परन्तु पणिः गाः प्रत्यर्पयितुं नैव इष्टवान्। ततःपरं इन्द्रेण साकं पणेः युद्धं सम्पन्नम्। तस्मिन् च युद्धे पणिं हत्वा सर्वाः गाः आदाय इन्द्रः इन्द्रलोकं गतः। संवादमाध्यमेन वृत्तान्तः अयं सम्यग्तया प्रस्फुटितः वर्तते। अत एव संवादस्य सरमापणिसंवादसूक्तम् इति नाम्ना सुप्रसिद्धम्।

पाठसारः

ऋग्वेदस्य दशममण्डलस्य अष्टाधिकैकशततं सूक्तं सरमापणिसंवादसूक्तम्। पणिः कश्चित् क्रुरः राक्षसः विद्यते। पणिः देवतानां सर्वाः गाः चोरितवान्। सर्वे प्रायः गोः अन्वेषणाय तत्पराः भवन्ति। एकदा बृहस्पतिः इन्द्रस्य सभां प्रति समागत्य ज्ञापितवान् यत् पणिनामकः कश्चित् असुरः गाः चोरितवान् अस्ति। पुनश्च रसानामकनद्याः पार्श्वे विद्यमानस्य पर्वतस्य गुहायाम् अत्यन्तं गुप्ततया गाः स्थापितवान्। वृत्तान्तं ज्ञात्वा सरमानामिकां काञ्चित् रमणीं दूतत्वेन पणेः सकाशं प्रेषितवान्। अत्यन्तं कष्टेन सरमा पणेः सकाशं गतवान्। ततःपरं पणिरपि प्रश्नम् अकरोत् यत् किमर्थं स्वर्गलोकात् इयं सुन्दरी अत्र आगतवती। सरमा उत्तरितवती यत् देवाः गोः विषये सर्वं वृत्तान्तं ज्ञातवान् अस्ति। अतः हे पणे इतः गच्छतु गाश्च प्रत्यर्पयतु। पणिः सगर्वेण कथयामास यत् मम रक्षणाय बहवः कर्मचारिणः एव नियुक्ताः सन्ति। अत एव गाः स्वीकर्तुं देवाः आयान्ति चेत् तेषामेव पराजयो भवेत्। यदि भवतीम् इन्द्रलोकात् ताडितवान् अस्ति तर्हि अस्माकं भगिनीत्वेन अत्र तिष्ठतु। एतत् सर्वम् आकर्ण्य सरमा उक्तवती यत् हे दुष्ट मम चिन्तां मा करोतु, स्वकीयजीवनस्य रक्षणाय गाः प्रदाय इतः शीघ्रं गच्छतु। परन्तु पणिः गाः प्रत्यर्पयितुं नैव इष्टवान्। ततःपरं इन्द्रेण साकं पणेः युद्धं सम्पन्नम्। तस्मिन् च युद्धे पणेः मारणं विधाय सर्वाः गाः स्वीकृत्य इन्द्रः इन्द्रलोकं गतवान्। संवादमाध्यमेन वृत्तान्तः अयं सम्यग्तया प्रस्फुटितः वर्तते। अत एव संवादस्य सरमापणिसंवादसूक्तम् इति नाम्ना सुप्रसिद्धम्।

पाठान्तप्रश्नाः

१. सरमापाणिसंवादसूक्तस्य सारं संक्षेपेण लिखत।

२. किमिच्छन्ती सरमा प्रेदमानङ्....इत्यादिमन्त्रं व्याख्यात।

३. इन्द्रस्य दूतीरिषिता चरामि.......इत्यादिमन्त्रं व्याख्यात।

४. की दृङिन्द्रः सरमे का दृशीका....इत्यादिमन्त्रं व्याख्यात।

५. नाहं तं वेद दभ्यं दभत्स........ इत्यादिमन्त्रं व्याख्यात।

६. इमा गावः सरमे ये ऐच्छः.......इत्यादिमन्त्रं व्याख्यात।

७. अयं निधि सरमे अद्रिबुध्नो.....इत्यादिमन्त्रं व्याख्यात।

८. एवा च त्वं सरसम्........इत्यादिमन्त्रं व्याख्यात।

९. नाहं वेदं भ्रातृत्वं नो स्वसृजम्.....इत्यादिमन्त्रं व्याख्यात।

१०. दूरमित पणयो वरीय उद्......इत्यादिमन्त्रं व्याख्यात।

११. सरमायाचरित्रं लिखत।

१२. सरमया उपस्थापितम् इन्द्रस्वरूपं लिखत।

१३. पणिपरिचयः प्रकटनीयः।

पाठगतप्रश्नानामुत्तराणि-

१. पणिः सरमां प्रति अकथयत्।

२. प्रेषिता इत्यर्थः।

३. इन्द्रस्य।

४. गाः दातुम् अङ्गीकृतवन्तः।

५. कियद् इत्यर्थः।

६. इन्द्रम्।

७. हिंसार्थकः।

८. युद्धं विना।

९. सुन्दरः इत्यर्थः।

१०. पणीनाम्।

११. पणिभ्यः।

१२. पर्वतैः।

१३. गोभिः अश्वैः आन्यान्यधनैश्च परिपूर्णा।

१४. सोमरसपानेन।

१५. गवां मोचनम्।

१६. सोमपानेन मत्ताः इत्यर्थः।

१७. सरमाम्।

१८. आगतवती इत्यर्थः।

१९. इन्द्रादयः।

२०. इन्द्रः, वृहस्पतिः, सोमेन अभिषवकारिणः ग्रावाणः, ऋषयः अङ्गिरसश्च ज्ञातवन्तः।

२१. इतः दूरदेशं पलायन्तु इति।

॥इति षड्विंशः पाठः॥